## द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः । (२४/६८६)

सुप् सुपा इति वर्तते । तस्य विशेषणमेतद् द्वितीया[1] । द्वितीयान्तं [2]सुबन्तं श्रितादिभिः[3] सह समस्यते, तत्पुरुषश्च समासो भवति । कष्टं श्रितः कष्टश्रितः । [4]नरकश्रितः । अतीत -- कान्तारमतीतः कान्तारातीतः । पतित -- नरकं पतितः नरकपतितः । गत -- ग्रामं गतः ग्रामगतः । अत्यस्त -- तरङ्गानत्यस्तः तरङ्गात्यस्तः । [5]तुहिनात्यस्तः । प्राप्त -- सुखं प्राप्तः सुखप्राप्तः[6] । आपन्न -- सुखमापन्नः सुखापन्नः । दुःखापन्नः ।

[७५] श्रितादिषु गमिगाम्यादीनामुपसङ्ख्यानम् । (म.भा. १.३८३)

[7]ग्रामं गमी ग्रामगमी । ग्रामं गामी ग्रामगामी । [8]ओदनं बुभुक्षुः ओदनबुभुक्षुः ॥

## स्वयं क्तेन । (२५/६८७)

स्वयम् [9]एतदव्ययमात्मना इत्यस्यार्थे वर्तते, तस्य द्वितीयया[10] सम्बन्धोऽनुपपन्नः इति द्वितीयाग्रहणमुत्तरार्थमनुवर्तते । स्वयम् इत्येतत् सुबन्तं क्तान्तेन[11] सह समस्यते, तत्पुरुषश्च समासो भवति । स्वयंधौतौ पादौ । स्वयंविलीनम् आज्यम्[12] । [13]ऐकपद्यमैकस्वर्यं च [14]समासत्वाद् भवति ॥

## खट्वा क्षेपे । (२६/६८८)

खट्वाशब्दो द्वितीयान्तः क्तान्तेन सह [15]क्षेपे गम्यमाने समस्यते, तत्पुरुषश्च समासो भवति । क्षेपो निन्दा, स च समासार्थ एव, तेन विभाषाऽधिकारेऽ[16]पि नित्यसमास एवायम् । न हि वाक्येन [17]क्षेपो गम्यते । खट्वारोहणं चेह विमार्गप्रस्थानस्योपलक्षणम् । सर्व एवाविनीतः खट्वारूढः [18]इत्युच्यते । खट्वारूढो जाल्मः । खट्वाप्लुतः[19] । [20]अपथप्रस्थितः इत्यर्थः । क्षेपे इति किम्? खट्वामारूढः[21] ॥

## सामि । (२७/६८९)

सामि इत्येतदव्ययमर्धशब्दपर्यायः, तस्यासत्त्ववाचित्वाद् द्वितीयया नास्ति सम्बन्धः । [22]तत् सुबन्तं क्तान्तेन सह समस्यते, तत्पुरुषश्च समासो भवति । सामिकृतम् । [23]सामिपीतम् । सामिभुक्तम् । [24]ऐकपद्यमैकस्वर्यं च [25]समासत्वाद् भवति ॥

---

1. श्रितादयश्च इत्यधिकम् क.ड.इ.फ.ह. 2. सुबन्तं नास्ति इ.फ. 3. सुबन्तैः इत्यधिकम् ड. 4. नरकश्रितः नास्ति फ.ह. 5. नरकमत्यस्तः नरकात्यस्तः ह, तुहिनात्यस्तः नास्ति फ. ह. 6. दुःखप्राप्तः इत्यधिकम् ह. 7. ग्रामं गमी नास्ति फ.ह. 8. ओदनं बुभुक्षुः नास्ति फ. 9. इत्येतदव्ययम् ब.क.ड. 10. द्वितीयासम्बन्धो ब.इ, सह सम्बन्धः क. 11. सुबन्तेन इत्यधिकम् क. 12. स्वयंविलोक्य इत्यधिकम् ब. 13. एकविभक्तिकत्वं च एकस्वर्यं च समासाद् भवति ड.फ. 14. समासात् क.ह. 15. क्षेपे गम्यमाने नास्ति फ. 16. अपि नास्ति फ. 17. सञ्ज्ञा ह. 18. इति नास्ति फ. 19. अध्यापकोऽध्यायति इत्यधिकम् क.ड.ह. 20. उत्पथ° ब.ड.इ.फ.ह. 21. खट्वारूढः अध्यापकोऽध्यापयति इत्यधिकम् क.फ.ह. 22. तत्पुनः क. 23. सामिपीतम्, सामिभुक्तम् नास्ति फ. 24. एकविभक्तित्वं च ड.फ. 25. समासात् क.इ.फ.ह.